णिनि । २आनन्दकारके त्रि० उभयत्र स्त्रियां ङीप् ।

**आनन्दी** स्त्री आनन्दयति आ+नदि–णिच्–अच्–गौरा० ङीष् (आकन पाता( वृक्षभेदे शब्दच० ।

**आनमन** न०आनम्यते वशीक्रियतेऽनेन करणे ल्युट् । सन्तोषार्थानुगत्यादौ १आनतौ । भावे ल्युट् । २सम्यग्नमने । णिच्+ल्युट् । नम्रतापादके ३व्यापारे ।

**आनमित** त्रि० आ+नम–णिच्–क्त । आवर्ज्जिते आनतीकृते अनुकूलीकृते ।

**आनम्य** त्रि० आ+नम–णिच्–कर्म्मणि यत् । १नम्रीकार्य्ये आ+नम–ल्यप् । २नमस्कृत्यर्थे अव्य० वा मलोपे लुकि आनत्येत्यप्यत्र अव्य० ।

**आनय** पु० आ+नी–भावे अच् । देशात् देशान्तरनयने । आनीयते वेदाद्यध्ययनायात्र आधारे अच् । उपनयनसंस्कारे हेम० । भावे ल्युट् । आनयनमप्युभयत्र न० ।

**आनर्त्त** उ० आनृत्यत्यत्र आधारे घञ् । १नृत्यशालायां २युद्धे च तत्र हि वीरैर्हर्षात् नृत्यमिव क्रियते इति तस्य तथात्वम् । ३सूर्य्यवंश्ये राजभेदे“मनोर्वैवस्वतस्यासन् पुत्रा वै नव तत्समाः । इक्ष्वाकुश्चैव नाभागो धृष्णुः शर्य्यातिरेव च” इत्युपक्रम्य “शर्य्यातेर्मिथुनं त्वासीदानर्त्तोनाम विश्रुतः । पुत्रः, कन्या सुकन्याख्या या पत्नी च्यवनस्य ह । आनर्त्तस्य तु दायादोरेवोनाम महाद्युतिः । आनर्त्तोविषयश्चासीत् पुरी चास्य कुशस्थली । रेवस्य रैवतः पुत्रः ककुद्मीनाम धार्म्मिकः । ज्येष्ठः पुत्रशतस्यासीद्राज्यं प्राप्य कुशस्थलीम् । स कन्यासहितं श्रुत्वा गान्धर्व्वं ब्रह्मणोऽन्तिके । मुहूर्त्तभूतं देवस्य गतं बहुयुगं प्रभो ! । आजगाम युगैर्वाथ स्वां पुरीं यादवैर्वृताम् । कृतां द्वारवतीं नाम्ना बहुद्वाराट्टतोरणाम् । भोजवृष्ण्यन्धकैर्गुप्तां वासुदेवपुरोगमैः । ततस्तद्रैवतोज्ञात्वा यथातत्त्वमरिन्दम ! । कन्यां तां बलदेवाय सुव्रतां नाम रेवतीम् । दत्त्वा जगाम शिखरं मेरोस्तपसि संशितः” हरिवं०१०अ० । तत्कृते ४देशभेदे आनर्त्तनामसूर्य्यवंश्यकृतत्वात्तस्य देशस्य आनर्त्तनामत्वम् । तत्रैव देशे च इक्ष्वाकुपुत्रहर्य्यश्वस्य पश्चात् राज्यमासीत् यथोक्तम्”

“आनर्त्तो नाम ते राष्ट्रं भविष्यत्यायतं महत् । तद्भविष्यमहं मन्ये कालयोगेन पार्थिव ! । अध्यास्यतां यथाकालं पार्थिवं वृत्तमुत्तमम् । यायातमपि वंशस्ते समेष्यति च यादवम् । अनुवंशञ्च वंशस्ते सोमस्य भविता किल । एष मे विभवस्तात तमेतं विषयोत्तमम् । दत्त्वा यास्यामि तपसे सागरं वरुणालयम् । लवणेन समायुक्तस्त्वमिमं विषयोत्तमम् । पालयस्वाखिलं तात ! स्वस्य वंशस्य वृद्धये । वाढमित्येव हर्य्यश्वः प्रतिजग्राह तत्पुरम् । स च दैत्यस्तपोवासं जगाम वरुणालयम् । हर्य्यश्वश्च महातेजा दिव्ये गिरिवरोत्तमे । निवेशयामास पुरं वासार्थममरोपमः । आनर्त्तं नाम तद्राष्ट्रं सुराष्ट्रं गोधनायुतम् । अचिरेणैव कालेन समृद्धं प्रत्यपद्यत । अनूपविषयश्चैव वेलावनविभूषितम् । निविष्टं क्षेत्रशस्याढ्यं प्राकारग्रामसंकुलम् । शशास स नृपः स्फीतं तद्राष्ट्रं राष्ट्रवर्द्धनः”९४अ० । अत्र च समुद्रवेलादिकं तत्सीमादिकमुक्तम् । ५तद्देशवासिजनेषु ६तद्राजेषु च ७चन्द्रवंश्ये राजभेदे पु० । “वषकेतोस्तु दायादो विभुर्नाम प्रजेश्वरः । आनर्त्तस्तु विभोः पुत्रो सुकुमारस्ततोऽभवत्” हरिवं० ३२ । तत्र तद्देश राजपरत्वे “आनर्त्तान् कालकुटांश्च कुलिन्दांश्च विजित्य सः”भा०स०२४अ० । देशवासिपरत्वे । “उक्तवांश्च महावाहो ! क्वासौ वृष्णिकुलाधम ः । वासुदेवः स मन्दात्मा वसुदेवसुतो गतः । तस्य युद्धार्थिनोदर्पं युद्धे नाशयिताऽस्म्यहम् । आनर्त्ताः ! सत्यमाख्यात तत्र गन्ताऽस्मि यत्र सः” इति आनर्त्तवासिनः प्रति साल्ववाक्यम् देशपरत्वे । “आनर्त्तेषु विमर्दञ्च क्षेपञ्चात्मनि कौरव ! इति भा०व० १४ अ० “आनर्त्तमेवाभिमुखाः शिवेन गत्वा धनुर्वेदरतिप्रधानाः” भा०व० १८३ अ० । कृत्तिकादिभिस्त्रिभिस्त्रिभिर्नक्षत्रैः क्रूरग्रहपीड़ितैः क्रमेण देशविशेषराजाशुभस्य वृ०सं० प्रतिपादनात् स्वात्यादिभिस्त्रिभिर्नक्षत्रैः क्रूरग्रपीड़ितैस्तद्देशनृपस्याशुभं भवति यथा वृ०स० कूर्म्मवि० । “वर्गैराग्नेयाद्यैः क्रूरग्रहपीड़ितैः क्रमेण नृपाः । पाञ्चालोमागधिकः कालिङ्गश्च क्षयं यान्ति । आवन्तोऽयानर्त्तो मृत्युं चायाति सिन्धुसौविरः । राजा च हारहौरोमद्रेशोन्यश्च कौणेन्द्रः” । आनृत्यतीति कर्त्तरि अच् । ८जले न० तस्य तरङ्गरूपेण नृत्यस्येव करणात्तथात्वम् ९नर्त्तके त्रि०भावे घञ् । १०नर्त्तने पु० ।

**आनर्त्तक** त्रि० आनर्त्तदेशे भवः धूमा० वुञ् । १आनर्त्तदेशभवे । आनृत्यति आ+नृत–ण्वुल् । २समन्तान्नर्त्तके त्रि० ।

**आनर्त्तपुर** न० आनर्त्तदेशस्य प्रधानं पुरम् । द्वारवत्याम् [पुर्य्याम् ।

**आनर्त्तीय** त्रि० आनर्त्तदेशे भवः वृद्धत्वात् छ । आनर्त्तदेशभवे ।

**आनर्थक्य** न० अनर्थस्य भावः ष्यञ् । १निष्प्रयोज-